जननी सिद्धसेनस्य उग्रचारी महातपाः" ॥
कुशिकस्य गोत्रापत्यं इति विदाद्यञ्। कुशिकाख्यनरपतेः पौत्री गाधिराजस्य कन्या विश्वामित्रस्य भगिनी ऋचीकमुनिपत्नी। कुशिकवंशजातत्वात् तस्यास्तथात्वम् ॥) नदीविशेषः। इति मेदिनी ॥ (यथा, रामायणे। १। ३४। ६—११।
"स पिता मम काकुत्स्थ! गाधिः परमधार्म्मिकः।
कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन! ॥
पूर्व्वजा भगिनी चापि मम राघव! सुव्रता।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥
सशरीरागता स्वर्गं भर्त्तारमनुवर्त्तिनी।
कौशिकी परमोदारा प्रवृत्ता च महा नदी ॥
दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता।
लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम्।
भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन! ॥
सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता।
पतिव्रता महाभागा कौशिकी सरितां वरा" ॥
"कौशिकी सरितां श्रेष्ठा कुलोद्योतकरी तव" ॥२१
असाविदानीं कुशी नदीति ख्याता। इयन्तु नेपालराज्यान्तर्गताया हिमवच्छाखाया निःसृता सती १९९ क्रोशान्तं गता गङ्गया सङ्गता ॥)

कौशिक्योजः, पुं, (कौशिक्या इव तीव्रं ओजो यस्य। पृषोदरात् सलोपः।) शाखोटवृक्षः। इति राजनिर्घण्टः। श्याओड़ा इति भाषा ॥

कौशीतकी, स्त्री, (कुशितकस्यापत्यम्। ऋष्यण् ततो ङीप्।) अगस्त्यपत्नी। इति त्रिकाण्डशेषः ॥ (कुशीतकेनाधीता प्रणीता वा या शाखा सा कौशीतकी। स्वनामख्यातवेदान्तर्गतशाखाविशेषः ॥ (ऋग्वेदान्तर्गत उपनिषद्विशेषः। यदुक्तं मुक्तिकोपनिषदि।
'मैत्रायणी कौशी(षी)तकी वृहज्जावालतापनी'॥)

कौशेयं, त्रि, (कोशे भवम्। इति ढक्।) कृमिकोशोत्थवस्त्रादि। इत्यमरः। २। ६। १११ ॥ मूर्द्धन्यमध्यञ्च ॥ (यथा, माघे। ८। ६।
"कौशेयं व्रजदपि गाढ़तामजस्रम्।
सस्रंसे विगलितनीविनीरजाक्ष्याः" ॥)

कौषिकः, पुं, (कौशिक + पृषोदरात् षकारादेशः।) कौशिकः। इति मेदिनी ॥

कौषिकी, स्त्री, (कौशिकी + पृषोदरात् षकारादेशः।) कौशिकी। इति मेदिनी ॥ कालिकाकायकोषनिःसृतदेवीविशेषः। यथा,—
"कायकोषान्निःसृता या कालिकायास्तु भैरव!।
सा कौषिकीति विख्याता चारुरूपा मनोहरा ॥
निःसृता हृदयाद्देव्या रसनाग्रेण चण्डिका।
नैतस्याः सदृशी मूर्त्या चारुरूपेण विद्यते ॥
त्रिषु लोकेषु कान्त्या वा नास्यास्तुल्या भविष्यति।
योगनिद्रा महामाया या मूलप्रकृतिः स्मृता ॥
तस्याः प्राणस्वरूपेयं देवी सा कौषिकी स्मृता।
नेत्रवीजं तथैतस्या वीजन्तु परिकीर्त्तितम् ॥
तन्त्रमस्याः प्रवक्ष्यामि सर्व्वकामप्रदं नृणाम्।
षमात्ति नान्त्यदन्त्यस्तु षष्ठवर्गादिविन्दुना ॥
षष्ठस्वरेण संसृष्टो विन्दुना समलङ्कृतः।
कौषिकीतन्त्रमन्त्रोऽयं धर्म्मकामार्थदायकः ॥
एतस्याः सम्प्रवक्ष्यामि मूर्त्तिरूपञ्च भैरव!।
शृणुष्वैकमना भूत्वा जगदाह्लादकारकम् ॥
धम्मिल्लसंयतकचा विधोश्चाधोमुखीं कलाम्।
केशान्ते तिलकस्योर्द्ध्वे दधती सुमनोहरा ॥
मणिकुण्डलसंघृष्टगण्डा मुकुटमण्डिता।
सज्योतिःकर्णपूराभ्यां कर्णमापूर्य्य सङ्गता ॥
सुवर्णमणिमाणिक्यनागहारविराजिता।
सदा सुगन्धिभिः पुष्पैरम्लानैरतिसुन्दरी ॥
मालां बिभर्त्ति ग्रीवायां रत्नकेयूरधारिणी।
मृणालायतवृत्तैस्तु बाहुभिः कोमलैः शुभैः ॥
राजन्ती कञ्चुकोपेतपीनोन्नतपयोधरा।
क्षीणमध्या पीतवस्त्रा त्रिवलीपरिभूषिता ॥
शूलं वज्रञ्च वाणञ्च खड्गं शक्तिं तथैव च।
दक्षिणैः पाणिभिर्द्देवी गृहीत्वातिविराजिता ॥
गदां घण्टाञ्च चापञ्च चर्म्म शङ्खं तथैव च।
ऊर्द्ध्वादिक्रमतो देवी दधती वामपाणिभिः ॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्म्मणि कौषिकी।
बिभ्रती रूपमतुलं सुरासुरमनोहरम् ॥
एतस्याः शृणु वत्स त्वं याः पूज्या अष्टयोगिनीः।
ताः पूजिताश्च कुर्व्वन्ति चतुर्व्वर्गं नृणां सदा ॥
ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा ॥
नारसिंही तथैवैन्द्री शिवदूती तथाष्टमी।
एताः पूज्या महाभागा योगिनीः कामदायिनीः" ॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ॥*॥
अन्यच्च।
"शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा।
स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समेतैः समरे निशुम्भेन पराजितैः।
शरीरकोषाद्यत्तस्याः पार्व्वत्या निःसृताम्बिका ॥
कौषिकीति समस्तेषु ततो लोकेषु गीयते" ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः ॥
अपरा व्युत्पत्तिर्यथा,—
"अल्पेनैवोपकारेण यस्माल्लोके सुखप्रदा।
कौषेयधारणाद्वापि सुप्रसादाच्च कौषिकी" ॥
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥

कौषेयं, त्रि, (कौशेय + पृषोदरात् षकारादेशः।) कृमिकोषोत्थवस्त्रादि। रेसमी कापड़ इति भाषा। इत्यमरटीकायां भरतः ॥ (यथा, मार्कण्डेयपुराणे। १५। २७।
"कोषकारश्च कौषेये हृते वस्त्रेऽभिजायते" ॥)

कौसीद्यं, क्ली, (कुत्सितं सीदति अस्मिन् इति। सीद + शः। ततः स्वार्थे ष्यञ्।) आलस्यम्। तन्द्रा। इति हेमचन्द्रः। (कुसीदस्य कर्म्म भावो वा। इति ष्यञ्।) कुसीदत्वम् ॥

कौसुमं, क्ली, (कुसुमेन निर्वृत्तम्। इत्यण्।) कुसुमाञ्जनम्। पुष्पाञ्जनम्। इति राजनिर्घण्टः ॥ (कुसुमस्येदम्। तस्येदमित्यण्। कुसुमसम्बन्धि वस्तुजातम्। कुसुमेषु भवम्। यथा) माघे। ७। ५७।
"विनयति सुदृशो दृशः परागं
प्रणयिनि! कौसुममाननानिलेन" ॥)

कौसुम्भः, पुं, (कुसुम्भ + स्वार्थे अण्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः ॥ (शाकविशेषः। यथा,—
"कौसुम्भं कोमलं शाकं कासमर्द्दविमर्द्दितम्।
पाचितं तप्तसृष्टे माषिमश्रविमिश्रितम्" ॥
इति शब्दार्थचिन्तामणिः ॥ कुसुम्भेन रक्तम्।
"तेन रक्तं रागात्"। ४। २। १। इत्यण्।) कुसुम्भपुष्परागयुक्ते त्रि। इत्यमरटीकायां रायमुकुटः। (यथा, माघे।
"कौसुम्भं पृथुकुचकुम्भसङ्गिवासः" ॥
कुसुम्भस्येदं तस्येदमित्यण्। कुसुम्भसम्बन्धिवस्तुमात्रम्। यथा, माघे। ११। ५२।
"दिनकरकरसङ्गव्यक्तकौसुम्भकान्ति" ॥)

कौसृतिकः, त्रि, (कुसृत्या कुत्सितगत्या चरति इति ठक्।) मायाकारः। इति जटाधरः ॥

कौस्तुभः, पुं, (कुं भुवं स्तुभ्नाति व्याप्नोति इति। कुस्तुभः सागरः तत्र भव इत्यण्। यद्वा, कुं भूमिं जगदित्यर्थः स्तुभते व्याप्नोति सर्व्वमाक्रम्य तिष्ठतीति भावः। कुस्तुभो विष्णुः तस्यायं मणिरित्यण्।) स्वनामख्यातो विष्णुवक्षःस्थो मणिः। इत्यमरः। १। १। ३० ॥ (यथा, भागवते। ८। ८। ५।
"कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः।
तस्मिन् हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ" ॥
"कौस्तुभस्तु महातेजाः कोटिसूर्य्यसमप्रभः।
इदं किमुत वक्तव्यं प्रदीपाद्दीप्तिमानिति" ॥
इति भागवतामृतम् ॥ मुद्राविशेषः। यथा,—
"अनामाङ्गुष्ठसंलग्ना दक्षिणस्य कनिष्ठिका।
कनिष्ठयान्यया बद्धा तर्जन्या दक्षया तथा ॥
वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके।
अङ्गुष्ठमध्यमे भूयः संयोज्य सरलाः पराः।
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका" ॥
इति तन्त्रसारः ॥

कौस्तुभवक्षाः, [स्] पुं, (कौस्तुभः वक्षसि उरःस्थले यस्य।) विष्णुः। इति हारावली ॥

क्नथ, कि म वधे। इति कविकल्पद्रुमः। (चुरां पक्षे भ्वां-परं-सकं-सेट्।) कि म, क्नथयति। इति दुर्गादासः ॥

क्नस, उ म य ह्वृतौ। भासने। इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट्।) एष दन्त्यनकारयुक्तः। उ, क्नसित्वा क्नस्त्वा। म, क्नसयति कान्त्या जगत्पान्थः। य, क्नस्यति खलः कुटिलः स्यादित्यर्थः। ह्वृतिरिह कौटिल्यम्। इति दुर्गादासः ॥

क्नस, इ कि भासने। इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-अकं-सेट्।) इ, क्नंस्यते। कि, क्नंसयति क्नंसति। भासनं दीप्तिः। इति दुर्गादासः ॥

क्नूय, ई ङ दुर्गन्धे। आर्द्रत्वे। शब्दे। इति कविकल्पद्रुमः ॥ दन्त्यनकारयुक्तो दीर्घी। (भ्वां-आत्मं-अकं-सेट्-ईर्निष्ठायामनिट्।) तथा च। क्नूयो स्नायति ते विदेव य इमे सेविस्व सेवितस्ता। इति शार्दूलविक्रीड़िते चण्डेश्वरः ॥ ई, क्नूतः। ङ,